## आदेच उपदेशेऽशिति। (४५/२३७०)

धातोः (६.१.८/२१७७) इति वर्तते। एजन्तो यो धातुरुपदेशे तस्याकारादेशो भवति, शिति तु प्रत्यये न भवति। ग्लै–ग्लाता। ग्लातुम्। ग्लातव्यम्। [1]शो–निशाता। निशातुम्। निशातव्यम्। एचः [2]इति किम्? कर्ता। हर्ता। उपदेशे इति किम्? चेता। स्तोता। अशिति इति किम्? ग्लायति। म्लायति। कथं जग्ले, [3]मम्ले? नैवं विज्ञायते, शकार इद् यस्य सो[4]ऽयं शित् इति, [5]किं तर्हि, श एव इत् शित्। तत्र 'यस्मिन् विधिस्तदादावल्ग्रहणे' (व्या.प. १२७) इति शिदादौ प्रत्यये प्रतिषेधः। एश् शकारान्तो भवति। अशिति इति प्रसज्यप्रतिषेधोऽयम्, तेन एतदात्त्वम् अनैमित्तिकं प्रागेव प्रत्ययोत्पत्तेर्भवति इति, [6]सुग्लः, सुम्लः इति 'आतश्चोपसर्गे' (३.१.१३६/२८९८) इति कप्रत्ययः, सुग्लानः, सुम्लानः इति 'आतो युच्' (३.३.१२८/३३०९) इत्येवमादि सिद्धं भवति [7]इति। आकाराधिकारस्त्वयं 'नित्यं स्मयतेः' (६.१.५७/२५९६) इति यावत्॥

## न व्यो लिटि। (४६/२४१६)

व्येञ् इत्येतस्य धातोः लिटि परत [8]आकारादेशो न भवति। संविव्याय। सविव्ययिथ। 'लिट्यभ्यास-स्योभयेषाम्' (६.१.१७/२४०८) इति अभ्यासस्य सम्प्रसारणम्[9]। णलि 'अचो ञ्णिति' (७.२.११५/२५४) इति वृद्धिः॥

## स्फुरतिस्फुलत्योर्घञि। (४७/३१८८)

आदेचः (६.१.४५/२३७०) इति वर्तते। 'स्फुर स्फुल चलने' (धा.पा. १३९०, १३९१) इत्येतयोर्धात्वोः एचः स्थाने घञि परतः आकारादेशो भवति। विस्फारः। विस्फालः। विष्फारः। विष्फालः। 'स्फुरति-स्फुलत्योर्निर्निविभ्यः' (८.३.७६/२५३७) इति [10]वा षत्वम्॥

## क्रीङ्जीनां णौ। (४८/२६००)

'डुक्रीञ् द्रव्यविनिमये' (धा.पा. १४७४), 'इङ अध्ययने' (धा.पा. १०४७) 'जि जये' (धा.पा. ९४७) इत्येतेषां धातूनां एचः स्थाने णौ परतः आकारादेशो भवति। क्रापयति। अध्यापयति। जापयति॥

---

1. म्लै–म्लाता म्लातुम् म्लातव्यम् इत्यधिकम् फ, गै–गाता गातुम् गातव्यम् इत्यधिकम् क. 2. इति नास्ति फ. 3. मम्ले नास्ति ग. 4. अयं नास्ति ग. 5. कथं ग. 6. तेन इत्यधिकम् ङ. 7. इति नास्ति 8. आत् आदेशः फ. 9. भवति इत्यधिकम् क.ह. 10. वा नास्ति फ.